## *2.5.5* संस्थान की संस्कृत भाषा में प्रश्न पत्र तैयार करने की नीति और छात्रों को संस्कृत में उत्तर लिखने के लिए प्रोत्साहित करने की व्यवस्था है।

***Institution has a policy of question paper setting in Sanskrit language and mechanism of encouraging students in writing* answers *in Sanskrit.***

---

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः भारतीयज्ञानशाखानां शिक्षणं प्रोत्साहयति। ज्ञानशाखाः ताः वेदः, वेदांगानि, दर्शनानि, शास्त्राणि, पुराणानि, काव्यानि च भवन्ति। सर्वाः इमाः शाखाः संस्कृतभाषया उपनिबद्धाः। वेदादीनां ज्ञानशाखानां सुष्ठु अवगतये संस्कृतभाषा एव आश्रयणीया। भाषान्तरे अवगमनापेक्षया मूलभाषायां सम्प्रत्ययः याथार्थ्येन भवति। अतः संस्कृतविश्वविद्यालयस्य सर्वे पाठ्यक्रमाः संस्कृतभाषायां संरचिताः सन्ति। विषयाणाम् अध्यापनं संस्कृतमाध्यमेन भवति। परीक्षायाः लेखनमाध्यमः संस्कृतभाषा देवनागरीलिपिश्च वर्तते।

विश्वविद्यालये शास्त्री, आचार्यः, शिक्षाशास्त्री, इत्येतेषु नियमितपाठ्यक्रमेषु छात्राः प्रवेशं प्राप्नुवन्ति। प्रवेशपरीक्षाम् उत्तीर्य आगतेषु तेषु द्विप्रकारकाः छात्राः भवन्ति। केचन पारम्परिकपद्धत्या पूर्वकक्ष्याम् उत्तीर्य समागताः। अन्ये केचन आधुनिकपद्धत्या पूर्वकक्ष्याम् उत्तीर्य समागताः। पारम्परिकपद्धत्या अधीत्य प्रवेशं लब्धवन्तः छात्राः कक्ष्यायां संस्कृतमाध्यमेन प्रवर्त्यमानं पाठम् अवगन्तुं पारयन्ति। लेखनेन च ते परिचिता भवन्ति। किन्तु आधुनिकपद्धत्या अधीत्य प्रवेशं लब्धवन्तः छात्राः पाठस्य अवगमने संस्कृतेन लेखने च क्लेशम् अनुभवन्ति। अतः प्रवेशसमानन्तरं सम्भाषाशिबिरं कार्यशाला च आयोज्यते। तेन भाषणे लेखने च प्राथमिकं ज्ञानं प्राप्नुवन्ति।

विश्वविद्यालयेन संचालनमाने शास्त्रिपाठ्यक्रमे आचार्यपाठ्यक्रमे च यथाक्रमम् नव्यव्याकरणम्, प्राचीनव्याकरणम्,. साहित्यम्, सिद्धान्तज्यौतिषम्, फलितज्यौतिषम्, सर्वदर्शनम्, धर्मशास्त्रम्, पुराणेतिहासः, वेदः, पौरोहित्यम्, जैनदर्शनम्, बौद्धदर्शनम्, सांख्ययोगः, नव्यन्यायः, प्राचीनन्यायवैशेषिकम्, मीमांसा, अद्वैतवेदान्तः, इत्यादयः त्रयस्त्रिंशद एकचत्वारिंशच्च विषया वर्तन्ते। एते विषयाः संस्कृतमाध्यमेनैव पाठ्यन्ते।

शास्त्रिपाठ्यक्रमे च आंग्लम् हिन्दी इत्यादयः सप्तदश पत्राणि भवन्ति। लेखनमाध्यमः संस्कृत भाषा एव भवति। इतिहासः/राजनीतिशास्त्रम्/ दर्शनम्/ समाजशास्त्रम्/ अर्थशास्त्रम् इति पत्रं संगणकविज्ञानम् इति पत्रंच आंग्लभाषामाध्यमेन, हिन्दीभाषामाध्यमेन वा पाठ्यते। संस्कृतभाषया अपि पाठ्यते। लेखनमाध्यमः संस्कृतम् हिन्दी आंग्लं वा भवितुम् अर्हति। एवंच आधुनिक भाषाणाम् इतिहासादिविषयाणां च अध्यापनस्य लेखनस्य च माध्यमः वैकल्पिकतया संस्कृतं निर्दिष्टं वर्तते।

शिक्षाशास्त्रिपाठ्यक्रमे आधुनिकभाषाविषयं विहाय इतराणि पत्राणि संस्कृतमाध्यमेन पाठयन्ते। छात्राणां शिक्षणाभ्यासः मनोविज्ञानस्य प्रायोगिकपरीक्षा च संस्कृतभाषया एव प्रवर्त्यते। विद्यावारिधिपाठ्यक्रमे शोधरताः छात्राः शोधप्रबन्धं संस्कृतमाध्यमेन प्रस्तुवन्ति। संस्कृतभाषायां लिखितस्यैव शोधप्रबन्धस्य परीक्षणयोग्यता इति विश्वविद्यालयस्य सामान्यः नियमः वर्तते। तेषां शोधस्य मूल्यांकनं परीक्षणंच संस्कृतमाध्यमेन भवति। एतत्तु छात्राणां गवेषणेन सह संस्कृतभाषाया विशिष्टां गतिं प्राप्तुं महान्तम् अवसरं कल्पयति।

**आचार्यपाठ्यक्रमात् शिक्षाशास्त्रिपाठ्यक्रमं यावत् निर्धारितः सर्वोऽपि विषयः संस्कृतवांगमये निहितानां तत्त्वानाम् अनुसन्धाने प्रवृत्तिं जानयति। संस्कृतमाध्यमेन पाठनेन इदं प्रयोजनं प्राप्तुं शक्यते। ज्ञेयः पदार्थः मूलभाषया ज्ञातः एव अव्यभिचरितो भवति।**

पारम्परिकधारायाम् अधीत्य प्रविष्टाः छात्राः इव आधुनिकधारायाम् अधीत्य प्रविष्टानाम् अपि सुलभग्राह्यतया रूचिं वर्धयति सम्भाषणपाठ्याक्रम :। असौ पाठ्यक्रमः संस्कृतेन अपरिचितेषु छात्रेषु जायमानां भीतिं निवारयति। अस्मिन्पाठ्यक्रमे शब्दकोषः, उच्चारणम्, वाक्यरचना, क्रियापदावली, इत्येतेषु बिन्दुषु अवधानं दीयते। सर्वोऽपि सम्भाषणपाठ्यक्रमः पूर्णतया संस्कृतमाध्यमेन संचाल्यते। भाषणकौशलम् अधिगन्तुम् एषः सरलः मार्गः। तस्मात् छात्राः अस्मिन् पाठ्यक्रमे उत्साहेन भागं गृह्णन्ति। एवं सर्वेषु स्तरेषु छात्रस्नेही पाठ्यक्रमः संचालनीयः इत्यपि विश्वविद्यालयस्य चिन्तनं वर्तते।

विद्यार्थिदशायां प्राप्तं सम्भाषणकौशलम् अग्रिमकाले अध्यापकत्वेन नियुक्तये अध्यापनकर्मणि च बहूपकारि भविष्यति। तत् इतरेभ्यः वैशिष्टयं ख्यापयति। अतः संस्कृतअध्यापकस्य संस्कृतसम्भाषणम् ' सत्ता' भवति। सम्प्रति प्राशासनिक विभागेषु संस्कृतं परिचाययितुं विश्वविद्यालयः कार्ययोजनां निर्माति। अग्रिमकाले संस्कृतविश्वविद्यालयस्य सर्वेऽपि विभागाः संस्कृतसम्भाषणेन परिचिताः भविष्यन्ति। संस्कृतभाषया सम्भाषणं कर्तुं विश्वविद्यालयद्वारा सर्वेभ्यः सर्वदा प्रोत्साहनं दीयमानं वर्तते। तेन कार्यालयीयाः अपि विशिष्टां प्रेरणां प्राप्य संस्कृते सम्भाषणं कर्तुं प्रभवन्ति। अध्यापकाश्च नूनं संस्कृतसम्भाषणं कुर्युः येन परिसरीयं वातावरणं संस्कृतं भवति इति विश्वविद्यालयेन उद्दिष्टं वर्तते। अतः नियुक्तौ तादृशाः कुशलाः एव अध्यापकत्वेन चीयन्ते। तेन छात्राः स्वयं प्रेरिता भविष्यन्ति। विश्वविद्यालयस्य साप्ताहिकमेलनम्, वार्षिकोत्सवः, नाट्यमहोत्सवः, युवमहोत्सवः इत्यादयः अनेके कार्यक्रमाः संस्कृतभाषायां भाषणस्य आद्यतां वहन्ति।